श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ पञ्चषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चषष्टितमः सर्गः ॥

## पर्यायेण वानरैः स्वस्वदूरगमनशक्तिपरिमाणस्य प्रतिपादनं जाम्बवदङ्गदयोः संलापो जाम्बवतो हनुमन्तं प्रेरयितुं तत्पार्श्वे गमनम्

अथाङ्गदवचः श्रुत्वा ते सर्वे वानरर्षभाः।
स्वं स्वं गतौ समुत्साहमूचुस्तत्र यथाक्रमम्॥ **4.65.1** ॥

गजो गवाक्षो गवयः शरभो गन्धमादनः।
मैन्दश्च द्विविदश्चैव सुषेणो जाम्बवांस्तथा॥ **4.65.2** ॥

आबभाषे गजस्तत्र प्लवेयं दशयोजनम्।
गवाक्षो योजनान्याह गमिष्यामीति विंशतिम्॥ **4.65.3** ॥

शरभो वानरस्तत्र वानरांस्तानुवाच ह।
त्रिंशतं तु गमिष्यामि योजनानां प्लवङ्गमाः॥ **4.65.4** ॥

ऋषभो वानरस्तत्र वानरांस्तानुवाच ह।
चत्वारिंशद् गमिष्यामि योजनानां न संशयः॥ **4.65.5** ॥

वानरांस्तु महातेजा अब्रवीद् गन्धमादनः।
योजनानां गमिष्यामि पञ्चाशत्तु न संशयः॥ **4.65.6** ॥

मैन्दस्तु वानरस्तत्र वानरांस्तानुवाच ह।
योजनानां परं षष्टिमहं प्लवितुमुत्सहे॥ **4.65.7** ॥

ततस्तत्र महातेजा द्विविदः प्रत्यभाषत।
गमिष्यामि न सन्देहः सप्ततिं योजनान्यहम्॥ **4.65.8** ॥

सुषेणस्तु महातेजाः सत्त्ववान् कपिसत्तमः।
अशीतिं प्रतिजानेऽहं योजनानां पराक्रमे॥ **4.65.9** ॥

तेषां कथयतां तत्र सर्वांस्ताननुमान्य च।
ततो वृद्धतमस्तेषां जाम्बवान् प्रत्यभाषत॥ **4.65.10** ॥

पूर्वमस्माकमप्यासीत् कश्चिद् गतिपराक्रमः।
ते वयं वयसः पारमनुप्राप्ताः स्म साम्प्रतम्॥ **4.65.11** ॥

किं तु नैवं गते शक्यमिदं कार्यमुपेक्षितुम्।
यदर्थं कपिराजश्च रामश्च कृतनिश्चयौ॥ **4.65.12** ॥

साम्प्रतं कालमस्माकं या गतिस्तां निबोधत।
नवतिं योजनानां तु गमिष्यामि न संशयः॥ **4.65.13** ॥

तांश्च सर्वान् हरिश्रेष्ठाञ्जाम्बवानिदमब्रवीत्।
न खल्वेतावदेवासीद् गमने मे पराक्रमः॥ **4.65.14** ॥

मया वैरोचने यज्ञे प्रभविष्णुः सनातनः।
प्रदक्षिणीकृतः पूर्वं क्रममाणस्त्रिविक्रमम्॥ **4.65.15** ॥

स इदानीमहं वृद्धः प्लवने मन्दविक्रमः।
यौवने च तदासीन्मे बलमप्रतिमं परम्॥ **4.65.16** ॥

सम्प्रत्येतावदेवाद्य शक्यं मे गमने स्वतः।
नैतावता च संसिद्धिः कार्यस्यास्य भविष्यति॥ **4.65.17** ॥

अथोत्तरमुदारार्थमब्रवीदङ्गदस्तदा।
अनुमान्य तदा प्राज्ञो जाम्बवन्तं महाकपिः॥ **4.65.18** ॥

अहमेतद् गमिष्यामि योजनानां शतं महत्।
निवर्तने तु मे शक्तिः स्यान्न वेति न निश्चितम्॥ **4.65.19** ॥

तमुवाच हरिश्रेष्ठं जाम्बवान् वाक्यकोविदः।
ज्ञायते गमने शक्तिस्तव हर्यृक्षसत्तम॥ **4.65.20** ॥

कामं शतसहस्रं वा नह्येष विधिरुच्यते।
योजनानां भवाञ्शक्तो गन्तुं प्रतिनिवर्तितुम्॥ **4.65.21** ॥

नहि प्रेषयिता तात स्वामी प्रेष्यः कथञ्चन।
भवतायं जनः सर्वः प्रेष्यः प्लवगसत्तम॥ **4.65.22** ॥

भवान् कलत्रमस्माकं स्वामिभावे व्यवस्थितः।
स्वामी कलत्रं सैन्यस्य गतिरेषा परन्तप॥ **4.65.23** ॥

अपि वै तस्य कार्यस्य भवान् मूलमरिन्दम।
तस्मात् कलत्रवत् तात प्रतिपाल्यः सदा भवान्॥ **4.65.24** ॥

मूलमर्थस्य संरक्ष्यमेष कार्यविदां नयः।
मूले हि सति सिध्यन्ति गुणाः सर्वे फलोदयाः॥ **4.65.25** ॥

तद् भवानस्य कार्यस्य साधनं सत्यविक्रम।
बुद्धिविक्रमसम्पन्नो हेतुरत्र परन्तप॥ **4.65.26** ॥

गुरुश्च गुरुपुत्रश्च त्वं हि नः कपिसत्तम।
भवन्तमाश्रित्य वयं समर्था ह्यर्थसाधने॥ **4.65.27** ॥

उक्तवाक्यं महाप्राज्ञं जाम्बवन्तं महाकपिः।
प्रत्युवाचोत्तरं वाक्यं वालिसूनुरथाङ्गदः॥ **4.65.28** ॥

यदि नाहं गमिष्यामि नान्यो वानरपुङ्गवः।
पुनः खल्विदमस्माभिः कार्यं प्रायोपवेशनम्॥ **4.65.29** ॥

नह्यकृत्वा हरिपतेः सन्देशं तस्य धीमतः।
तत्रापि गत्वा प्राणानां न पश्ये परिरक्षणम्॥ **4.65.30** ॥

स हि प्रसादे चात्यर्थकोपे च हरिरीश्वरः।
अतीत्य तस्य सन्देशं विनाशो गमने भवेत्॥ **4.65.31** ॥

तत्तथा ह्यस्य कार्यस्य न भवत्यन्यथा गतिः।
तद् भवानेव दृष्टार्थः सञ्चिन्तयितुमर्हति॥ **4.65.32** ॥

सोऽङ्गदेन तदा वीरः प्रत्युक्तः प्लवगर्षभः।
जाम्बवानुत्तमं वाक्यं प्रोवाचेदं ततोऽङ्गदम्॥ **4.65.33** ॥

तस्य ते वीर कार्यस्य न किञ्चित् परिहास्यते।
एष सञ्चोदयाम्येनं यः कार्यं साधयिष्यति॥ **4.65.34** ॥

ततः प्रतीतं प्लवतां वरिष्ठ -
मेकान्तमाश्रित्य सुखोपविष्टम्।
सञ्चोदयामास हरिप्रवीरो
हरिप्रवीरं हनुमन्तमेव॥ **4.65.35** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे पञ्चषष्टितमः सर्गः॥